योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः ०६

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

तस्मात्प्राक्पौरुषाद्दैवं नान्यत्तत्प्रोज्झ्य दूरतः ।

साधुसंगमसच्छास्त्रैर्जीवमुत्तारयेद्बलात् ।। १

यथा यथा प्रयत्नः स्याद्भवेदाशु फलं तथा ।

इति पौरुषमेवास्ति दैवमस्तु तदेव च ।। २

दुःखाद्यथा दुःखकाले हा कष्टमिति कथ्यते ।

हाकष्टशब्दपर्यायस्तथा हा दैवमित्यपि ।। ३

प्राक्स्वकर्मेतराकारं दैवं नाम न विद्यते ।

बालः प्रबलपुंसेव तज्जेतुमिह शक्यते ।। ४

ह्यस्तनो दुष्ट आचार आचारेणाद्य चारुणा ।

यथाशु शुभतामेति प्राक्तनं कर्म तत्तथा ।। ५

तज्जयाय यतन्ते ये न लोभलवलम्पटाः ।

ते दीनाः प्राकृता मूढाः स्थिता दैवपरायणाः ।। ६

पौरुषेण कृतं कर्म दैवाद्यदभिनश्यति ।

तत्र नाशयितुर्ज्ञेयं पौरुषं बलवत्तरम् ।। ७

यदेकवृन्तफलयोरथैकं शून्यकोटरम् ।

तत्र प्रयत्नः स्फुरितस्तथा तद्रससंविदः ।। ८

यत्प्रयान्ति जगद्भावाः संसिद्धा अपि संक्षयम् ।

क्षयकारकयत्नस्य ह्यत्र ज्ञेयं महद्बलम् ।। ९

द्वौ हुडाविव युध्येते पुरुषार्थौ परस्परम् ।

य एव बलवांस्तत्र स एव जयति क्षणात् ।। १०

भिक्षुको मङ्गलेभेन नृपो यत्क्रियते बलात् ।

तदमात्येभपौराणां प्रयत्नस्य बलं महत् ।। ११

पौरुषेणान्नमाक्रम्य यथा दन्तेन चूर्ण्यते ।

अन्यः पौरुषमाश्रित्य तथा शूरेण चूर्ण्यते ।। १२

अन्नभूता हि महतां लघवो यत्नशालिनाम् ।

यथेष्टं विनियोज्यन्ते तेन कर्मसु लोष्टवत् ।। १३

शक्तस्य पौरुषं दृश्यमदृश्यं वापि यद्भवेत् ।

तद्दैवमित्यशक्तेन बुद्धमात्मन्यबुद्धिना ।। १४

भूतानां बलवद्भूतं यन्न दैवमिति स्थितम् ।

तत्तेषामप्यधिष्ठातृ सतामेतत्स्फुटं मिथः ।। १५

शास्त्रामात्येभपौराणामविकल्पा स्वभावधीः ।

या सा भिक्षुकराज्यस्य कर्तृ धर्तृ प्रजास्थितेः ।। १६

भिक्षुको मङ्गलेभेन नृपो यत्क्रियते क्वचित् ।

प्राक्तनं पौरुषं तत्र बलवद्वापि कारणम् ।। १७

ऐहिकः प्राक्तनं हन्ति प्राक्तनोऽद्यतनं बलात् ।

सर्वदा पुरुषस्पन्दस्तत्रानुद्वेगवाञ्जयी ।। १८

द्वयोरद्यतनस्यैव प्रत्यक्षाद्बलिता भवेत् ।

दैवं जेतुं यतो यत्नैर्बालो यूनेव शक्यते ।। १९

मेघेन नीयते यद्वद्वत्सरोपार्जिता कृषिः ।

मेघस्य पुरुषार्थोऽसौ जयत्यधिकयत्नवान् ।। २०

क्रमेणोपार्जितेऽप्यर्थे नष्टे कार्या न खेदिता ।

न बलं यत्र मे शक्तं तत्र का परिदेवना ।। २१

यन्न शक्नोमि तस्यार्थे यदि दुःखं करोम्यहम् ।

तदमारितमृत्योर्मे युक्तं प्रत्यहरोदनम् ।। २२

देशकालक्रियाद्रव्यवशतो विस्फुरन्त्यमी ।

सर्व एव जगद्भावा जयत्यधिकयत्नवान् ।। २३

तस्मात्पौरुषमाश्रित्य सच्छास्त्रैः सत्समागमैः ।

प्रज्ञाममलतां नीत्वा संसारजलधिं तरेत् ।। २४

प्राक्तनश्चैहिकश्चेमौ पुरुषार्थौ फलद्द्रुमौ ।

संजातौ पुरुषारण्ये जयत्यभ्यधिकस्तयोः ।। २५

कर्म यः प्राक्तनं तुच्छं न निहन्ति शुभेहितैः ।

अज्ञो जन्तुरनीशोऽसावात्मनः सुखदुःखयोः ।। २६

ईश्वरप्रेरितो गच्छेत्स्वर्गं नरकमेव वा ।

स सदैव पराधीनः पशुरेव न संशयः ।। २७

यस्तूदारचमत्कारः सदाचारविहारवान् ।

स निर्याति जगन्मोहान्मृगेन्द्रः पञ्जरादिव ।। २८

कश्चिन्मां प्रेरयत्येवमित्यनर्थकुकल्पने ।

यः स्थितोऽदृष्टमुत्सृज्य त्याज्योऽसौ दूरतोऽधमः२९

व्यवहारसहस्राणि यान्युपायान्ति यान्ति च ।

यथाशास्त्रं विहर्तव्यं तेषु त्यक्त्वा सुखासुखे ।। ३०

यथाशास्त्रमनुच्छिन्नां मर्यादां स्वामनुज्झतः ।

उपतिष्ठन्ति सर्वाणि रत्नान्यम्बुनिधाविव ।। ३१

स्वार्थप्रापककार्यैकप्रयत्नपरता बुधैः ।

प्रोक्ता पौरुषशब्देन सा सिद्ध्यै शास्त्रयन्त्रिता ।। ३२

क्रियया स्पन्दधर्मिण्या स्वार्थसाधकता स्वयम् ।

साधुसंगमसच्छास्त्रतीक्ष्णयोन्नीयते धिया ।। ३३

अनन्तं समतानन्दं परमार्थं विदुर्बुधाः ।

स येभ्यः प्राप्यते नित्यं ते सेव्याः शास्त्रसाधवः ।।३४

देवलोकादिहागत्य लोकद्वयहितं भवेत् ।

प्राक्तनं पौरुषं तद्वै दैवशब्देन कथ्यते ।। ३५

तद्युक्तमेतदेतस्मिन्नास्ति नापवदामहे ।

मूढैः प्रकल्पितं दैवं मन्यन्ते ये क्षयं गताः ।। ३६

नित्यं स्वपौरुषादेव लोकद्वयहितं भवेत् ।

ह्यस्तनी दुष्क्रियाभ्येति शोभां सत्क्रियया यथा ३७

अद्यैवं प्राक्तनी तस्माद्यत्नाद्यः कार्यवान्भवेत् ।

करामलकवद्दृष्टं पौरुषादेव तत्फलम् ।

मूढः प्रत्यक्षमुत्सृज्य दैवमोहे निमज्जति ।। ३८

सकलकारणकार्यविवर्जितं

निजविकल्पबलादुपकल्पितम् ।

तदनपेक्ष्य हि दैवमसन्मयं

श्रय शुभाशय पौरुषमात्मनः ।। ३९

शास्त्रैः सदाचरविजृम्भितदेशधर्मैर्य-

त्कल्पितं फलमतीव चिरप्ररूढम् ।

तस्मिन्हृदि स्फुरति चोपनमेति चित्त-

मङ्गावली तदनु पौरुषमेतदाहुः ।। ४०

बुद्ध्वैव पौरुषफलं पुरुषत्वमेत-

दात्मप्रयत्नपरतैव सदैव कार्या ।

नेया ततः सफलतां परमामथासौ

सच्छास्त्रसाधुजनपण्डितसेवनेन ।। ४१

दैवपौरुषविचारचारुभि-

श्चेदमाचरितमात्मपौरुषम् ।

नित्यमेव जयतीति भावितैः

कार्य आर्यजनसेवयोद्यमः ।। ४२

जन्मप्रबन्धमयमामयमेष जीवो

बुद्ध्वैहिकं सहजपौरुषमेव सिद्धौ ।

शान्तिं नयत्ववितथेन वरौषधेन

मृष्टेन तुष्टपरपण्डितसेवनेन ।। ४३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे दैवनिराकरणं नाम षष्ठः सर्गः ।। ६ ।।